# श्री चन्द्रशेखरेन्द्रसरस्वती विश्वमहाविद्यालयः (मानितविश्वविद्यालयः)

## प्रार्थना
**DAILY PRAYER**

SRICHANDRASEKHARENDRA
SARASWATHI VISWA
MAHAVIDYALA
(DEEMED UNIVERSITY)
ENATHUR
KANCHIPURAM
PIN 631561

# University Prayer

**प्रार्थना**

**वागीशाद्या :सुमनसःसर्वार्थानामुपक्रमे ।**
**यं नत्वा कृतकृत्याः स्युः तं नमामि गजाननम्।।**

**या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता**
**या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना।**
**या ब्रह्माच्युतशंकरप्रभृतिभिर्देवैः सदा पूजिता**
**सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा।।**

**श्रुतिस्मृतिपुराणानामालयं करुणालयं**
**नमामि भगवत्पादशंकरं लोकशंकरम्।।**

**ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिम्।**
**आधारं सर्वविद्यानां हयग्रीवमुपास्महे ।।**

**वरदं द्विरदाद्रीशं श्रीनिधिं करुणानिधिम्।**
**शरण्यं शरणं यामि प्रणतार्तिहरं हरिम्।।**

**अपारकरुणा सिन्धुं ज्ञानदं शान्तरूपिणम्**
**श्री चन्द्रशेखरगुरुं प्रणमामि मुदान्वहम्।।**

# तोटकाष्टकम्

विदिताखिलशास्त्रसुधाजलधे
महितोपनिषत्कथितार्थनिधे।
हृदये कलये विमलं चरणं
भव शङ्करदेशिक मे शरणम्।। 1

करुणावरुणालय पालय मां
भवसागरदुःखविदूनहृदम्।
रचयाखिलदर्शनतत्त्वविदं
भव शङ्करदेशिक मे शरणम्।। 2

भवता जनता सुखिता भविता
निजबोधविचारणचारुमते।
कलयेश्वरजीवविवेकविदं
भव शङ्करदेशिक मे शरणम्।। 3

भव एव भवानिति मे नितरां
समजायत चेतसि कौतुकिता।
मम वारय मोहमहाजलधिं
भव शङ्करदेशिक मे शरणम्।। 4

सुकृतेऽधिकृते बहुधा भवतो
भवितासमदर्शनलालसता।
अतिदीनमिमं परिपालय मां
भव शङ्कर देशिक मे शरणम्।। 5

जगतीमवितुं कलिता कृतयो
विचरन्ति महामहसश्छलतः।
अहिमांशुरिवात्र विभासि गुरो
भव शङ्करदेशिक मे शरणम्।। 6

गुरुपुङ्गव पुङ्गवकेतन ते
समतामयतां न हि कोऽपि सुधीः।
शरणागतवत्सल तत्त्वनिधे
भव शङ्करदेशिक मे शरणम्।। 7

विदिता न मया विशदैककला
न च किञ्चन काञ्चनमस्ति गुरो।
द्रुतमेव विधेहि कृपां सहजां
भव शङ्करदेशिक मे शरणम्।। 8

नागेन्द्रहाराय त्रिलोचनाय भस्माङ्गरागाय महेश्वराय ।
नित्याय शुद्धाय दिगम्बराय तस्मै नकाराय नमः शिवाय
।।

# लिङ्गाष्टकम्

ब्रह्ममुरारिसुरार्चितलिङ्गं
निर्मलभासितशोभितलिङ्गम्।
जन्मजदुःखविनाशकलिङ्गं
तत्प्रणमामि सदाशिवलिङ्गम्।। 1

देवमुनिप्रवरार्चितलिङ्गं
कामदहं करुणाकरलिङ्गम्।
रावणदर्पविनाशकलिङ्गं
तत्प्रणमामि सदाशिवलिङ्गम्।। 2

सर्वसुगन्धिसुलेपितलिङ्गं
बुद्धिविवर्धनकारणलिङ्गम्।
सिद्धसुरासुरवन्दितलिङ्गं
तत्प्रणमामि सदाशिवलिङ्गम्।। 3

कनकमहामणिभूषितलिङ्गं
फणिपतिवेष्टितशोभितलिङ्गम्।
दक्षसुयज्ञविनाशकलिङ्गं
तत्प्रणमामि सदाशिवलिङ्गम्।। 4

कुङ्कुमचन्दनलेपितलिङ्गं
पङ्कजहारसुशोभितलिङ्गम्।
सञ्चितपापविनाशकलिङ्गं
तत्प्रणमामि सदाशिवलिङ्गम्।। 5

देवगणार्चितसेवितलिङ्गं
भावयभक्तिभिरेव च लिङ्गम्।
दिनकरकोटिप्रभाकरलिङ्गं
तत्प्रणमामि सदाशिवलिङ्गम्।। 6

अष्टदलोपरिवेष्टितलिङ्गं
सर्वसमुद्भवकारणलिङ्गम्।
अष्टदरिद्रविनाशकलिङ्गं
तत्प्रणमामि सदाशिवलिङ्गम्।। 7

सुरगुरुसुरवरपूजितलिङ्गं
सुरवनपुष्पसदार्चितलिङ्गम्।
परात्परं परमात्मकलिङ्गं
तत्प्रणमामि सदाशिवलिङ्गम्।। 8